नवान्नं, क्ली, ( नवं नूतनं अन्नम् । ) नूतनान्नम् । तन्निमित्तश्राद्धम् । यथा,—

वराह उवाच ।

"अकृत्वा यो नवान्नानि मम कर्म्मपरायणः ।
भुञ्जन्ति ये नवान्नानि परैः भुक्तानि केन ह ॥
नाहं लोभेन चेच्छामि पुनर्भोगेन सुन्दरि ! ।
अवश्यमेव कर्त्तव्यं मम कर्म्मपरायणैः ॥
ततो भागवतो भूत्वा नवान्नं यो न कारयेत् ।
पितरस्तस्य नाश्नन्ति वर्षाणि दश पञ्च च ॥
अदत्त्वा यस्तु भुञ्जीत नवान्नानि कथञ्चन ।
न तस्य धर्म्मो विद्येत एवमेतन्न संशयः ॥
अन्यच्च ते प्रवक्ष्यामि येन तत्र प्रमुच्यते ।
प्रायश्चित्तं महाभागे ! मम भक्तसुखावहम् ॥
उपवासं त्रिरात्रन्तु तत एकेन वा पुनः ।
आकाशशयनं कृत्वा चतुर्थेऽहनि शुध्यति ॥
एवं तत्र विधिं कृत्वा उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्बिषात् ॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वसङ्गान् परित्यज्य मम लोकाय गच्छति ॥"

इति नवान्नभोजनापराधप्रायश्चित्तम् ॥ इति वराहपुराणम् ॥*॥ तस्य निषिद्धदिनं यथा,—

"सूर्य्ये चैव विशाखगे स्मरतिथौ पापे त्रिजन्मान्विते
नन्दामन्दमहीजकाव्यदिवसे पौषे मधौ कार्त्तिके ।
मैत्रूग्राहिशिवेश विष्णुशयने कृष्णे शशिन्यष्टमे
श्राद्धं भोजनकं नवान्नविहितं पुत्रार्थनाशप्रदम् ॥"

सूर्य्ये चैव विशाखगे मार्गशीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयावस्थिते सूर्य्ये । स्मरतिथौ त्रयोदश्याम् । पापे पञ्चमताराश्रये । उग्रः पूर्व्वात्रयमघाभरण्यः । अहिरश्लेषा । शिव आर्द्रा ।

"ज्येष्ठापौषाह्नगे सूर्य्ये त्यक्त्वाग्निशालके ।
नवान्नैर्भोजनं श्राद्धं जन्मचन्द्रे तिथौ न च ॥
अश्लेषाकृत्तिकाज्येष्ठामूलाजपदकेषु च ।
भृगुभौमदिने रिक्तातिथौ नाद्यान्नवौदनम् ॥"

तस्य विधिर्यथा,—

"प्राश्नीयाद्दधिसंयुक्तं नवं विप्राभिमन्त्रितम् ॥"

दीपिकायाम् ।

"मैत्रूग्राहिशिवान्येषु त्विभौमशनिवासरे ।
अन्नप्राशनवत् कुर्य्यान्नव।न्नफलभक्षणम् ॥"

अधिकन्तु ।

"हस्ता स्वातिपुनर्व्वसू मृगशिरःपुष्यानुराधा तथा
मूलायां श्रवणे च रेवतिधने चित्रामघे वारुणी ।
ब्राह्मे शक्रविशाखयोश्च तुरगे सौम्येन्दुजीवार्कके
चन्द्रे शोभनतारके च शुभदं श्राद्धं नवान्नैः कृतम् ॥"

भोजराजः ।

"भद्रा विष्णुदृढसती शशधरो मार्त्तण्डपौष्णादितौ
मैत्रे चैव विशाखवायुश्रवणे मूलाश्विवह्नौ तथा ।
शुक्रे वारुण चन्द्रके शुभदिने श्राद्धं नवं शस्यते
नन्दाभार्गवभूमिजेषु न भवेच्छ्राद्धं नवान्नोद्भवम् ॥"

इति ज्योतिस्तत्त्वम् ॥

आश्विनाधिकारे ।

"शुक्लपक्षे नवं धान्यं ज्ञात्वा पक्वं सुशोभनम् ।
गच्छेत् चैत्री विधानेन गीतवाद्यपुरःसरः ॥"

इत्यादिना ब्रह्मपुराणेन श्राद्धविधानात् ॥

अपि च ।

"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥"

इति मलमासतत्त्वम् ॥

नवाम्बरं, क्ली, (नवं नूतनमम्बरं वस्त्रम् ।) नूतनवस्त्रम् । इत्यमरः । २ । ६ । ११२ ॥ ( यथा, समयप्रदीपे ।

"शीर्णं रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुचं बुधदिने च भवेद्धनाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसङ्गमाय
मन्दे मराय च नवाम्बरधारणं स्यात् ॥")

नवार्च्चिः, [ स् ] पुं, ( नव अर्च्चींषि यस्य । ) मङ्गलग्रहः । इति त्रिकाण्डशेषः ॥ ( क्ली, नवं नूतनं अर्च्चिः ।) नवशिखा ॥ (नव अर्च्चींषि इति विग्रहेण तु नवसंख्यककिरणार्थे बहुवचनम् ॥ )

नवाहः, पुं, ( नवं अहः । समासे टच् । ) नवदिनम् । प्रतिपत्तिथिः । इति त्रिषः ॥

नविका, स्त्री, ( नवोऽस्त्यस्या इति । नव+ठन्+टाप् । नविं नवं कायति इति वा ।) नवयौवनयुक्ता । इति स्त्रीप्रत्ययप्रकरणे दुर्गादासः ॥

नवीनं, त्रि, ( नवमेव । नव+"नवस्य न्वादेशो-नप्तनप्ख्राश्च प्रत्यया वक्तव्याः ।"५ । ४ । ३५ । इत्यस्य वार्त्तिकोक्त्या खः न्वादेशश्च ।) नूतनम् । इत्यमरः । ३ । १ । ७७ ॥ ( यथाच गदाधरः ।

"गदाधरविनिर्म्मिता विविधदुर्गतर्काटवी
नवीनपदवीमुदं दिशतु सर्वा धीमताम् ॥" )

नवोढ़ा, स्त्री, (नवा नूतना ऊढ़ा) नवविवाहिता । तत्पर्य्यायः । वधूः २ जनी ३ । इति जटाधरः ॥ नववरिका ४ दिक्करी ५ नवयौवना ६ । इति हारावली । १५४ ॥ मुग्धानायिकाभेदः । तस्या लक्षणं यथा । "लज्जाभयपराधीनरतिर्नवोढ़ा ॥" तस्या उदाहरणं यथा, रसमञ्जर्य्याम् ।

"बलान्नीता पार्श्वं सुखमसुखं नैव कुरुते
धुनानामूढ़ानां क्षिपति वदनं चुम्बनविधौ ।
हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना
नवोढ़ा वोढ़ारं रमयति च सन्तापयति च ॥"

नवोदकं, क्ली, (नवमुदकम् ।) नूतनजलम् । यथा, मिताक्षरायां स्मृतिः ।

"काले नवोदकं शुद्धं न पातव्यं तत् त्र्यहम् ।
अकाले तु दशाहानि पीत्वा नाद्यादहर्निशम् ॥"

इति शुद्धितत्त्वम् ॥

तन्निमित्तकं श्राद्धं कर्त्तव्यम् । यथा, शातातपः ।

"नवोदके नवान्ने च गृहप्रच्छादने तथा ।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ॥
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥"

नवोदके वर्षोपक्रमे । आर्द्रागते रवाविति यावत् ।

'आर्द्रादितो विशाखान्तं रविचारेण वर्षति ।'

इति नयवर्द्धमानधृतात् ॥

'प्राविट्काले समायाते रौद्रऋक्षगते रवौ ।
नाड़ीवेधसमायोगे जलयोगं वदाम्यहम् ॥'

इति रुद्रयामलाच्च ॥

रौद्रमार्द्रा ॥ * ॥ नवोदकश्राद्धस्य सावकाशत्वात् त्रयोदश्यादिकनिषेधमाह दीपिकायाम् ।

'त्रयोदशीं जन्मदिनञ्च नन्दां
जन्मर्क्षतारां सितवासरञ्च ।
त्यक्त्वा हरीन्द्वर्करान्त्यमैत्र-
ध्रुवेषु च श्राद्धविधानमिष्टम् ॥'

सितवासरं शुक्रवारम् । ऋक्षं राशिः । हर्य्यादयः श्रवणपुष्यमृगशिरोहस्तारेवत्यनुराधोत्तराचितयरोहिण्यः । कृष्णपक्षे चेन्नवोदकश्राद्धकालस्तदोभयोः श्राद्धयोस्तन्त्रात् सिद्धिः ।" इति तिथ्यादितत्त्वम् ॥

नवोद्धृतं, क्ली, ( नवमुद्धृतम् । ) नवनीतम् । इत्यमरः । २ । ९ । ५२ ॥ नूतनोत्थिते, त्रि ॥

नव्यं, त्रि, (नूयते स्तूयते इति । नु स्तुतौ+"अचो यत् ।" ३ । १ । ९७ । इति यत् । यद्वा, नवमेव । "शाखादिभ्यो यत् ।" ५ । ३ । १०३ । इति स्वार्थे यत् ।) नूतनम् । इत्यमरः ।३।१।७७॥ ( यथा, ऋग्वेदे । १ । ५५ । ११ ।

"नव्या नव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम् ॥"

स्तुत्यम् । यथा, ऋग्वेदे । ५ । १२ । ३ ।

"कया नो अग्न ऋतयन्नृतेन
भुवो नवेदा उचथस्य नव्यः ॥" )

स्त्री, स्तुतिः । नु न स्तुतौ भावे यत् नवशब्दात् स्वार्थे वे निष्पन्नः ॥

नव्यः, पुं, ( नूयते इति । नु+यत् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

नश्याकः, पुं, ( नश्यतीति । नश नाशे+"आकः स्पणादेः स तु कित् ।" ४।२२३। इति उणादिकोषटीकाधृतसूत्रात् आकः ।) काकभेदः । इत्युणादिकोषः ॥

नशिता, [ ऋ ] त्रि, नाशाश्रयः । इति नशधातोः कर्त्तरि तृच्प्रत्ययनिष्पन्नः ॥

नश्यत्प्रसूतिका, स्त्री, ( नश्यन्ती प्रसूतिः सन्ततिर्यस्याः । कप् । ततष्टाप् । ) मृतवत्सा । तत्पर्य्यायः । नष्टः २ मृतपुत्रिका ३ । इति हेमचन्द्रः । ३ । १९५ ॥

नश्वरः, त्रि, ( नश्यतीति । नश+"इण्नशजिसर्त्तिभ्यः क्वरप् ।" ३ । २ । १६३ । इति क्वरप् ।) नाशप्रतियोगी । ध्वंसयोग्यः । इति नशधातोः कर्त्तरि क्वरप्प्रत्ययनिष्पन्नः ॥ ( यथा, भागवते । ५ । १८ । ४ ।